International Journal of Sanskrit Research 2019; 5(6): 155-164

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(6): 155-164
© 2019 IJSR
www.anantaajournal.com
Received: 19-09-2019
Accepted: 21-10-2019

**डॉ. बैकुण्ठ नाथ शुक्ल**
असिस्टैण्ट प्रोफेसर एवम् अध्यक्ष–संस्कृतविभाग, नेहरू मैमोरियल शिव नारायण दास पी. जी. कॉलेज, बदायूँ, उत्तर प्रदेश, भारत

**Corresponding Author:**
**डॉ. बैकुण्ठ नाथ शुक्ल**
असिस्टैण्ट प्रोफेसर एवम् अध्यक्ष–संस्कृतविभाग, नेहरू मैमोरियल शिव नारायण दास पी. जी. कॉलेज, बदायूँ, उत्तर प्रदेश, भारत

# शब्दशास्त्रस्य शास्त्रीयसमीक्षापुरस्सरं सर्वमयत्वं व्यावहारिकत्वं लोकोपयोगित्वञ्च

**डॉ. बैकुण्ठ नाथ शुक्ल**

**सारांशः**
अस्मिन् लेखे मया आचार्यभर्तृहरिणा कृते वाक्यपदीयनामके ग्रन्थे विद्यमानदार्शनिकतथ्यान्यधिकृत्य शब्दशास्त्रस्य शास्त्रीयसमीक्षापुरस्सरं सर्वमयत्वं व्यावहारिकत्वं लोकोपयोगित्वञ्च प्रदर्श्यते। यथोक्तं भगवता भर्तृहरिणा स्वकीये वाक्यपदीये ग्रन्थे शब्दत्वापत्तिप्रसङ्गे यतः शब्दाश्रितं खलु सर्वमर्थात्मकं जगत्। सर्वा हि लोकप्रकृतिः शब्दाश्रया संसृतिश्चेय शब्दनिष्पत्तिरूपा नन्वस्ति। सर्वं ह्यस्ति ज्ञानं शब्दानुविद्धम्, शब्द एवास्ति संसारिणां सञ्ज्ञा अनादिश्च प्राणिनां शब्दभावना।

**कूटशब्दाः** शब्दशास्त्रस्य, शास्त्रीयसमीक्षापुरस्सरम्, सर्वमयत्वम्, व्यावहारिकत्वम्, लोकोपयोगित्वम्।

## प्रस्तावना
यथोक्तं भगवता भर्तृहरिणा स्वकीये वाक्यपदीये ग्रन्थे शब्दत्वापत्तिप्रसङ्गे यतः शब्दाश्रितं खलु सर्वमर्थात्मकं जगत्। सर्वा हि लोकप्रकृतिः शब्दाश्रया संसृतिश्चेयं शब्दनिष्पत्तिरूपा नन्वस्ति। सर्वं ह्यस्ति ज्ञानं शब्दानुविद्धम्, शब्द एवास्ति संसारिणां सञ्ज्ञा अनादिश्च प्राणिनां शब्दभावना। निगदितमप्याचार्येण स्वकीये वाक्यपदीये-

> "शब्देष्वेवाश्रिता शक्तिर्विश्वस्यास्य निबन्धिनी।
> यन्नेत्रः प्रतिभात्मायं भेदरूपः प्रतीयते।।" (वा.प. 1/12)

अस्य विश्वस्य निबन्धनी कारणात्मिका शक्तिः शब्देष्वेव आश्रितास्ति, नान्यत्रेत्येवकारणेन, शब्द एव जगत्कारणमित्यर्थो विश्वरूपेऽस्मिञ्जगति तत्तदर्थव्यक्तयः (वस्तूनि पदार्थाः) तत्रतत्र स्वमूर्तिसत्ताभ्यां वर्तन्ते, परं

तथावर्तमानानां तासां न कश्चिद्व्यावहारिकः प्रयोगः। तासां व्यवहारनिबन्धनी शक्तिस्तद्वाचकशब्देष्वेव आश्रिता वर्तते। अतोऽस्य विश्वरूपस्य जगतः सत्त्वासत्त्वयोः कारणात्मिका शक्तिः शब्देष्वेवाश्रिता खल्वस्ति। केनापि कुत्रापि दृष्टानुभूतं वस्तु ज्ञेयत्वेन वाच्यत्वेन च शब्दानुविद्धमेवास्ति। यच्च वस्तु न केनापि कुत्रापि कदापि वा दृष्टानुभूतं तन्न ज्ञेयं न वाच्यं न च सत्तायुक्तमेवास्ति।

शब्दतत्त्वं ह्यस्ति सर्वप्रकृतिः। तस्मिंश्च शब्दे श्रुत्यर्थशक्ती संसृष्टे स्तः। शब्दार्थयोस्तदेवाधिष्ठानम् इत्यर्थः। सर्गप्रवृत्तौ शब्दतत्त्वमेव श्रुतिशक्त्या अर्थशक्त्या च समन्वितं वाच्यवाचकभावेन शब्दत्वेनार्थत्वेन च नामरूपात्मकतया विवर्तते विपरिणमते वा। एवं च सर्वा अपि शब्दव्यक्तयोऽर्थव्यक्तयश्चेत्युभयमपि शब्दतत्त्वनिबन्धनम्। शास्त्रे आकृतिपक्षः उभयानामपि व्यक्तीनामानन्त्याद् लाघवार्थं समाश्रियते। तेन शब्दाकृतयोऽर्थाकृतयश्च "सूक्ष्मशब्दाधिष्ठाननिबन्धनाः" इत्युच्यन्ते। ताश्चाकृतयो व्यवहारनिवृत्तये स्वस्वव्यक्तिभिरन्वियन्ति। सर्गादौ विश्वमिदं जगत् सूक्ष्मशब्दाधिष्ठाननिबन्धनमिति। परमत्र शब्देष्विति बहुवचनोपादानात् सूक्ष्मशब्दतत्त्वस्य अबहुत्वाद् उक्तप्रकारेण आकृतिपक्षाश्रयणं न सम्यक् प्रतीयते। पुनश्चास्य भेदरूपस्य जगतः परिच्छेदिका प्रवर्तिका च शब्दशक्तिरेव। तत्र घटपटादिभेदरूपं वाच्यवाचकभेदरूपं स्फोटरूपं व्यङ्ग्यव्यञ्जकभावरूपं च विश्वं प्रातिभमेव न तु वास्तवम्। शब्दशक्तिर्यदा यदा यां यां प्रतिभां जनयति, तदा तदा भेदभिन्नं विश्वं विवर्तते परिणमते वेत्यर्थः। मृदियं, घटोऽयमित्यादौ भेदरूपे परमार्थतः पृथ्वीं प्रति शब्दशक्तिजनिता प्रतिभैव कारणम्, उतापि पृथ्वीयम्, तेज इदमित्यादावपि परमतत्त्वं (शब्दतत्त्वं) पृथ्वीति शब्दव्यक्तिजनिता प्रतिभैव तादृशभेदरूपस्य हेतुः। अत एवाह आचार्यवृषभः-

> "विच्छेदग्रहणेऽर्थानां प्रतिभान्यैव जायते।" (वा.प. 2/143)

भेदात्मिकेयं प्रतीतिः शब्दात्मनः शब्दतत्त्वस्य वा स्वप्नप्रबोधप्रवृत्तिरूपास्ति। प्रबोधे हि जागृदवस्थायां पृथक्त्वेन प्रतीयमानानां नदीवनपर्वतगृहकुड्यचैत्रमैत्रादीनां स्वप्ने पुनः स्वपितरि पुरुष एवोपसंहारः, पुनर्जागरणे च तथैव पृथक्प्रतीतिः, तथैवार्थरूपविषयाणां प्रविनश्यतामिन्द्रियेषु, इन्द्रियासां बुद्धिषु बुद्धिनां च प्रतिसंहृतक्रमे वागात्मन्युपसंहारः। सर्गे पुनस्तेनैव पृथगवस्थानं भवति। अत्राशङ्क्यते- कथं ज्ञायते वागात्मन्येवोपसंहारः, न पुनरीश्वरे पारे ब्रह्मणि वेति दर्शनप्रकारपेण अत्रोच्यते यदि शब्दशक्तिः अर्थव्यक्तिः परिच्छेदिका अस्ति, यदि च अर्थव्यक्तेः भेदरूपेण सत्त्वमसत्त्वं च शब्दव्यक्त्याश्रितमिति प्रत्यक्षम्, तदा अर्थव्यक्त्या लेयोऽपि शब्दात्मन्येव भवितुमर्हति, तत एव च सर्गो भवति। इदमेव ध्वनितं "शब्देष्वि" ति बहुवचनोपादेन। अतएव च-

> "वागेवार्थं पश्यति, वाग्, ब्रवीति, वागेवार्थं निहितं सन्तनोति।
> वाच्येव विश्वं बहुरूपं निबद्धं, तदेतदेकं प्रविभज्योपभुङ्क्ते।।" इत्याहुः।

सर्वं हि व्यावहारिकम् अर्थात्मकं च जगत् शब्दाश्रितमेव वर्तते। षड्जऋषभगान्धारमध्यमधैवतनिषादाः स्वरभेदाः सङ्गीतशास्त्रे प्रसिद्धाः सन्ति। एतेषामेव स्वराणां समायोजवेन भैरवादयो रागा निवर्तन्ते। गायकस्तु बोलालापतरानादिभिः प्रकारैः रागं नरूपयति। अतः स्वरभेदनिरूपणाय निबन्धनपदानि (Notation in

Western Music) प्रकल्पितानि सन्ति "सारेगपधनि" इति। एभिश्च पदैः (शब्दैः) स्वरभेदोऽवधार्यते। दुरधिगमस्याप्यधिगमः, अरूपस्यापि निरूपणं शब्दैरेव भवति। रूपणं परिच्छेदः, भेदेनावधारणम्। आआऽऽ इत्यालापेन गायता गायकेन कुत्र कः स्वरः प्रयुक्त इति सामान्यतया न परिज्ञायते, 'सारेगा' इत्यादिनिबन्धनपदप्रयोगे तु निरूप्यते। यतः एतद्भवति ततः सर्वा अर्थविधाः, वस्तुवैविध्यम्, शब्दशक्तिषु आश्रिता इत्यपि सुसङ्गतमेव खल्वस्ति। निगदितमप्याचार्येण भर्तृहरिणा-

> "षड्जातिभेदः शब्देन व्याख्यातो रूप्यते यतः।
> तस्मादर्थविधाः सर्वाः शब्दमात्रासु निःश्रिताः।।" (वा.प.1/119)

अणूनां शब्दत्वापत्तिसामर्थ्यप्रसङ्गेऽपि शब्दतत्त्वस्य वैशिष्ट्यं वर्णितमेवास्ति। वैशेषिकमते पृथिव्यपतेजोवायूनां मूलघटकाः तत्तत्परमाणवो नित्याः, आकाशस्य तु नेति चतुर्धा परमाणवः भवन्ति। साङ्ख्यास्तु 'रूपरसगन्धस्पर्शशब्दतन्मात्ररूपैक' तेजादिपञ्चमहाभूतानां मूलघटकान् पञ्चपरमाणून् स्वीकुर्वन्ति। जैनाश्च पुद्गलपदवाच्यान् पञ्चपरमाणून् महाभूतानां घटकान् मन्यन्ते। आधुनिकाश्चापि पदार्थमात्रम् अणुघटितम् इति वदन्ति। आधुनिकास्तु द्रव्यमात्रस्य तत्त्वम् (Element) यौगिकम् (Compound) मिश्रणम् (Mixture) इत्यवस्थात्रयं विविच्य प्रत्येकं द्रवस्य सूक्ष्मतमकणान् अणून्निरूपयन्ति (Molucules) इति। एते चाणवः स्वस्वद्रवस्य गुणधर्मं धारयन्ति। परस्पराकर्षणबलेन संसृष्टाः संसर्गवृत्तिं दर्शयन्ति, स्वसत्तां पृथङ्निरूपयन्तश्च भेदवृत्तिं दर्शयन्ति। ते चापि स्वतत्त्वे परस्परमाकृष्टा अतः संसृष्टाः, तथापि विरला अतो भेदवन्तो भेदसंसर्गवृत्रयो भवन्ति। परमाणवश्च नाभिनेमिक्रमेण विभागत्रयं भजन्ते- न्यूट्रान् (Nutron) प्रोटान् (Protane) इलेक्ट्रान् (Electrane) इति च। एते चापि न्यूट्रानादयः परस्पराकर्षणेन संसृष्टाः परं परस्परविलग्नास्तिष्ठन्तीति भेदसंसर्गवृत्तिं दर्शयन्ति। यदि केनाप्युपायेन परमाणूनाम् इयं भेदसंसर्गवृत्तिः उच्छेदयितुं शक्येत तर्हि महत्यूर्जारुत्पद्येत, इति वदन्ति। अत एव परमाणुविखण्डनाख्येनकर्मणा (Nuclear Fission) शब्दा उत्पद्यन्ते। आधुनिकनये तु परमाणुविखण्डने (Fission) परमाणुसम्पीडने (Fusion) च या ऊर्जाः (उर्जस् शब्दः सविशेषं स्त्रियां प्रयुक्त इति ज्ञेयम्) विसृष्टा भवति सा ऊष्माणं शब्दं च जनयति। वायव्याः परमाणवः शब्दभावेन परिणमन्त इति प्राधान्येन वक्तव्ये प्रसङ्गादन्येषामप्येकैकमुदाहृतम्। एवं हि सर्वे परमाणवः शब्दरूपेण परिणमन्ति। यथा-

> "अणवः सर्वशक्तित्वात् भेदसंसर्गवृत्तयः।
> छायातपतमःशब्दभावेन परिणामिनः।।"
> (वा.प. 1/110)

शब्दतत्त्वाभिधेयाः परमाणवः शब्दभावेन व्यक्तीभवनाय प्रवर्तमानायां तदनुकूलव्यापारेण प्रेरिताः मेघाः इव, प्रचीयन्ते, प्रचयं गच्छन्ति, वर्धन्ते, श्रवणयोग्यस्थूलतां लभन्ते। शब्दतन्मात्रा नभसः श्रोत्रेन्द्रियग्राह्यस्य शब्दस्य च कारणं भवति। एवं हि गन्धाख्याः, रूपाख्याः, रसाख्याः, स्पर्शाख्याः, शब्दाख्याश्च परमाणवः प्रसिध्यन्ति। तत्र पञ्चविधपरमाणुषु ये शब्दाख्याः परमाणवस्ते श्रवणीयशब्दत्वेन आपद्यन्ते। द्वयणुकादिक्रमेण घनीभूताः शब्दाख्याः परमाणवः इन्द्रियातीतां सूक्ष्मतां विहाय श्रवणीयतां लभन्ते। तत्र दृष्टान्तः अभ्राणि सन्ति। जलीयवाष्पाणि नभसि विकीर्णानि अव्यक्तानि वायुना समीरितानि घनीभूतानि व्यक्ततां प्राप्तानि घनत्वं लभन्ते। एवं उक्तप्रकारेण

शब्दाख्याः परमाणवः शब्दत्वम् आपद्यन्ते शोभनेयमुपमा। यथोक्तम्-

> "स्वशक्तौ व्यज्यमानायां प्रयत्नेन समीरिताः।
> अभ्राणीव प्रचीयन्ते शब्दाख्याः परमाणवः।।" (वा.प. 1/111)

पुनश्चायं संसारः शब्दतत्त्वस्य परिणामः इति आगमज्ञाः विदन्ति। सर्गादौ विश्वमेतद् छन्दोभ्यः विवृतमभवत्। सर्वा अप्यर्थविधाः शब्दशक्त्याश्रिता भवन्तीति न अस्मत्परिकल्पनामात्रम्, "छन्दोभ्यः एव प्रथमेद्विश्वं व्यवर्तत, अतः शब्दस्य परिणामोऽयं संसारः" इति तु आम्नायविदोऽपि विदन्ति। यथा ऋङ्मन्त्रे निगदितमस्ति-

"इन्द्राच्छन्दः प्रथमं प्रास्यदन्नं तस्मादिमे नामरूपे विषूची।
नाम प्राणाच्छन्दसो रूपमुत्पन्नमेकं छन्दो बहुधा चाकशीति।।" (ऋग्वेदः)
पुनश्च शतपथब्राह्मणग्रन्थेऽपि

> "वागेव विश्वा भुवनानि जज्ञे वाच इत्सर्वममृतं यच्च मर्त्यम्।
> अथेद्वाग्बुभुजे वागुवाच पुरुत्रा वाचो न परं यच्च नाह।।" (श.प.ब्रा. 6/5/3/4)

हरिवृषभवृत्तौ सर्वमिदं यथायथं निर्दिष्टम् अस्ति यत्- कार्येषु कारणधर्मसमन्वयं दृष्ट्वा यथा अन्ये दार्शनिकाः सूक्ष्मम् अणुग्रामम्, प्रदानशक्तिम् अविद्यां वा जगत्कारणत्वेन व्यवस्थापयन्ति तथैव वैयाकरणाः शब्दात्मानं जगत्कारणम् ऊरीकुर्वन्ति। शब्दतत्त्वं हि चिदचिदात्मके जगति विवर्तते न तु वैखरीवर्णाद्विश्वं विवर्तते। तच्च जगत्सचेतनानां मानवानां दर्शनानुभवविषयं सज्ज्ञानात्मा भूत्वा सवाचां बुद्धौ स्फोटरूपेण तिष्ठति। स च ज्ञानात्मा विवक्षावशात् वैखरीवर्णाकारेण तत्तत्पदार्थान् निबन्धनपदैः स्मृतिनिरूपणया, अभिजल्पनिरूपणया आकारनिरूपणया च परिच्छिद्य व्यवहाराङ्गत्वेन तेषां वस्तुसत्तां परिकल्पयन्निव आविर्भावयति। एषा हि शब्दतत्त्वस्य प्रबोधवृत्तिः। स्वप्नवृत्तौ पुनस्तस्मिन्नेव शब्दात्मनि सर्वेषां लयः भवति। तदत्र सत्यमेवोक्तम्-

> "शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः।
> छन्दोभ्यः एव प्रथममेतद् विश्वं व्यवर्तत।।" (वा.प.1/120)

ज्ञानस्य शब्दत्वापत्तिप्रसङ्गेऽपि निगदितमस्ति यत् शब्दभावनां विना शब्दोच्चारणादिकार्यप्रवृतिः न सम्भवति। प्रत्ययोऽपि शब्दानुगमादृते न सम्भवति इति। प्रत्ययो नाम ज्ञानम्। तच्च ज्ञानं शब्दानुगतमित्यर्थः। न केवलं ज्ञानं ज्ञानं भवति, शब्दानुगतं तु ज्ञानं ज्ञानं भवति इति विज्ञेयम्। शब्दतत्त्वमेव वाग्रूपतया जगति प्रकाशितं भवति। शब्दात्मनः एषा वाग्रूपतैव प्रकाशमपि प्रकाशयति। प्रकाशो ज्ञानं तेजश्च स्वपररूपप्रकाशकत्वात्। वाग्रूपतैव प्रकाशस्य प्रकाशिका प्रत्यविमर्शिनी शक्तिरस्ति। अनुव्यवसायो नाम प्रत्यवमर्शः। प्रकाशितस्य ज्ञातस्य च अवधारिका हि वागित्यर्थः। वाह्यान्तरयोः प्रकटाप्रकटयोरित्युभयोः प्रकाशयिता शब्दाख्यः प्रकाशो वाक्। सा तु वाक् उभयेन प्रकाशेन प्रकाशितमपि प्रकाशयति इति तस्या अनुव्यवसायः। यदि चेत् वाग्रूपता ज्ञानस्य शब्दस्वरूपत्वं विच्छिन्ना स्यात्, तदा प्रकाशः ज्ञानं न प्रकाशेत, विज्ञायेत। अत एव वाग्रूपता ज्ञानस्य शाश्वतो धर्मः। उक्तमपि भर्तृहरिणा-

"वाग्रूपता चेदुत्क्रामेदवबोधस्य शाश्वती।
न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी।।"
(वा.प. 1/124)

वाग्रूपता ह्येषा संसारिणां जगति वसतां प्राणिनां सञ्ज्ञा खल्वस्तु। संसारिणस्तु संसारे वर्तमानाः जीवाः पदार्थाश्च। तेन हि जगति जीवानां चैतन्यत्वेन संवित्त्या च वाग्रूपता संसारिणां सञ्ज्ञा। एवं च चेतनाचेतनानां स्थावरजङ्गमानां च सञ्ज्ञा वाग्रूपतैव अस्ति। सा तु सर्वेषां सवाचां सजीवानां बहिरन्तश्च वर्तते। बहिर्वैखरीरूपेण अन्तश्च पश्यन्तीरूपेण ज्ञानरूपेण वा चैतन्याधिष्ठानतया वर्तते। अवाचाम् अजीवानां तु बहिरभिधानतया अन्तस्तु शब्दतत्त्वाधिष्ठानतया वाग्रूपतैव सञ्ज्ञारूपेण विद्यते। यथा-

"ब्रह्मेदं शब्दनिर्माणं शब्दशक्तिनिबन्धनम्।

विवृतं शब्दमात्राभ्यस्तास्वेव प्रविलीयते।।" इत्यादिदर्शनात्।

वाक्यपदीयकारेण भगवता भर्तृहरिणापि एतत्प्रसङ्गे उद्घाटितमस्ति यत्-

"सैषा संसारिणां सञ्ज्ञा बहिरन्तश्च वर्तते।
तन्मात्रामनतिक्रान्तं चैतन्यं सर्वजातिषु।।"
(वा.प. 1/126)

पुनरत्र वृषभाचार्येणापि स्ववृत्तौ -
"भेदोद्ग्राहविवर्तने लब्धाकारापरिग्रहा।

आम्नाता सर्वविद्यासु वागेव प्रकृतिः परा।।" एवमुक्तमस्ति।

शब्दो हि परमात्मतत्त्वम्। अस्मिन् संसारे द्वौ शब्दात्मानौ स्तः - नित्यः कार्यश्च। तत्र कार्यो व्यावहारिकः पुरुषः, श्रुतिरूपश्चास्ति। स चान्तरवस्थितस्य शब्दात्मनः प्रतिबिम्बोपग्राही। प्रयोक्तुः, वक्तुः श्रोतुश्चान्तरवस्थितं शब्दात्मानं शब्दस्वरूपिजीवात्मानं वा महान्तमृषभं श्रुतयो कथयन्ति। यथा-

"चत्वारि श्रृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य।
त्रिधा बद्धो वृषभो रोरवीति, महोदेवो मर्त्या आविवेश।।" इति। (ऋग्वेदसंहिता 4/58/3, महा.पस्पशा.)

नित्यस्तु सर्वव्यवहारयोनिः, संहृतक्रमः, सर्वेषाम् अन्तःसन्निवेशी, सर्वेषां विकाराणां प्रभवः, सर्वकर्मणाम् आश्रयः, सुखदुःखयोरधिष्ठानम्, सर्वत्र अप्रतिहतकार्यशक्तिः, घटादिनिरुद्ध इव प्रकाशः, परिग्रहीतभोगक्षेत्रावधिः, सर्वमूर्तीनामपरिमाणा प्रकृतिः, सर्वबोधरूपतया सर्वभेदरूपतया च नित्यप्रवृत्तप्रत्यवभासस्वप्नप्रबोधानुकारी, प्रवृत्तिनिवृत्तिपदाभ्यां पर्जन्यवद् दवाग्निवच्च प्रसवोच्छेदयुक्तः, सर्वेश्वरः, सर्वशक्तिः, महान् शब्दवृषभोऽस्ति। तेन महता शब्दवृषभेण तादात्म्यं शाब्दिकानाम् इष्टम्। एतस्मिन् विषये वाक्यपदीयकारेणापि कथितमस्ति-

"अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम्।
प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते।।"
(वा.प. 1/130)

पुनरिदानीं शब्दशास्त्रज्ञः व्याकरणज्ञः वा छन्दयोनिं शब्दात्मानं पश्यति अनुभवतीति शब्दत्वं व्याख्याय तत्प्राप्त्युपायतयानुकारत्वेन च व्याकरणस्य व्यावहारिकत्वम् उपयोगित्वं च विवेचनीयं खल्वस्ति। अर्थव्यवहारः शब्देनैव भवति। अर्थविषयिण्यः प्रवृत्तयः शब्दैरेव सम्भवन्ति। अर्थस्य प्रवृत्तितत्त्वं विवक्षा, न तु वस्तुस्वरूपतया सत्त्वम् असत्त्वं वा।

विवक्षेयं शब्दाधीना, योग्यशब्दनिबन्धना च नन्वस्ति। विवक्षैव वाह्यपदार्थानां सत्ताम् असत्तां वा विहाय व्यवहारस्य प्रवृत्तिनवृत्त्योः कारणं भवति। भगवता पतञ्जलिनाप्युक्तम्- "सतोऽप्यविवक्षा भवति। तद्यथा- अलोमिका एडका। अनुदरा वान्येति। असतश्च विवक्षा भवति। समुद्रः कुण्डिका। विन्ध्यो वर्धिकमिति।" (महाभाष्ये, अपादानसञ्ज्ञाप्रककणम्)

यथा पूर्वमेवोक्तम् अर्थविषयिण्यः सर्वाः प्रवृत्तयः शब्दैरेव सम्भवन्ति। शब्दानां तत्त्वावबोधः ऋते व्याकरणान्न भवति। शब्दार्थव्यवहारोऽपि व्याकरणं विना न भवति। शब्दानां भावः शब्दतत्त्वम् अर्थबोधजनकत्वं वा अस्ति। शब्दस्य तत्त्वम् अवैकल्यम्, अपगतसंस्कारं साधुस्वरूपम्। तद्धि साधुत्वासाधुत्वविवेचनप्रसङ्गेऽपि व्याकरणस्योपयोगित्वं दृश्यते खलु। अत एव व्याकरणस्य वैशिष्ट्यम्, माहात्म्यं व्यावहारिकत्वं वा स्पष्टमेवास्ति। निगदितमपि भर्तृहरिणा-

> "अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम्।
> तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते।।" (वा.प. 1/13)

व्याकरणस्मृतिर्हि एकपदागमा विद्यास्ति। एकपदम् ओङ्काररूपम् आगम उद्गमो यस्याः सा एकपदागमा विद्या। सैव निश्चयेन, सत्या वास्तविकी, विशुद्धिः विशिष्टा शुद्धिः स्वीकृता। वेदं विवेचयन्तः विद्वांसः प्रणवरूपेण युक्ताम् एकपदां विद्यामेव वेदे सत्यां विशुद्धिमूरीकुर्वन्ति। परं तु अत्रैवं नास्ति, हि एकपदागमाया एव सत्यत्वेन विशुद्धत्वेन च स्वीकारेऽवशिष्टवेदस्य अशुद्धत्वापत्तेः।

उषःसूक्तपृथ्वीसूक्तादीनामविशुद्धत्वस्वीकारे तु वेदमाहात्म्यस्य सुमहती हानिः स्यात्। अतः स्मृतीनां वादानामेव च परामर्शः सुव्यवस्थितः। सर्वतः सुहृत्क्रमं शब्दतत्त्वम्, तद् एव एकपदागमो यस्याः सा व्याकरणविद्या। सैव व्याकरणविद्या सर्वोपकारकत्वात् सर्ववादाविरोधिनी स्वीकृतास्ति। यथा-

> "सत्याविशुद्धिस्तत्रोक्ता विद्यैवैकपदागमा।
> युक्ता प्रणवरूपेण सर्ववादाविरोधिनी।।" (वा.प. 1/9)

तात्पर्यमस्ति यदेषा व्याकरणविद्या सर्वेषां वादप्रवादानाम् अविरोधितत्वेन वर्णितप्रणवस्वरूपयुक्तास्ति। षड्वेदाङ्गेषु व्याकरणस्य प्राधान्यं सुविदितं खल्वस्ति। तद्धि व्याकरणं शब्दतत्त्वस्य निकटतमम्, साक्षादुपकारि वास्ति। शब्दसाधुत्वं व्याकरणस्य नियमः। शब्दार्थसम्बन्धव्याक्रियारूपा शब्दसाधुत्वज्ञानविषया व्याकरणस्मृतिः शब्दात्मकस्य ब्राह्मण आसन्नतमा अस्ति। यतः शब्दात्मा अर्थभावम् आप्नोति। इयं च व्याकरणस्मृतिः शब्दार्थसम्बन्धं व्याकरोति। स्वरूपाभिव्यक्तये विवृत्तमानस्य शब्दात्मनः प्रकृतिप्रत्ययव्युत्तिमाध्यमेन सुमहानुपकारो व्याकरणस्य अस्ति। तपश्च पुनः धर्मस्यैका विद्या व्याकरणञ्च ब्रह्मचर्यादिवाक्कायमनःपावनानां तपसां मध्ये दृष्टादृष्टफलजनकतया उत्तमं तपः कथ्यते। यथोक्तं मुण्डकोपनिषदि-

> "तपसा चीयते ब्रह्म।" (मुण्डकोपनिषद् 1.1.8)

ब्रह्मप्राप्तिसाधनत्वं यस्य तपस उच्यते तत् शब्दात्मकस्य ब्रह्मणः प्राप्तौ केन अन्येन भवितव्यं व्याकरणम् अन्तरा। तर्हि ब्रह्मप्राप्तौ अनन्यतया उत्तमं तप इति कथ्यते। ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति। आगमप्रयोजनं च षट्स्वङ्गेषु प्राधान्येन निर्दिष्टं भवति। उक्तमपि

महाभाष्यकारेण भगवता पतञ्जलिना महाभाष्ये- "प्रधानं च षट्स्वङ्गेषु व्याकरणम्, प्रधाने च कृतो यत्नः फलवान् भवति।" यस्य अक्षरसमाम्नायस्यज्ञानमात्रेण सर्वेषां वेदानां फलप्राप्तिरागमनेन स्मर्यते, तच्छन्दसां प्रधानम् अङ्गं व्याकरणमिति। तर्हि-

"आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः।
प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः।।" (वा.प. 1/11)

व्याकरणं हि पुनः शब्दाख्यस्य ज्योतिषोऽधिगममार्गः खल्वस्ति। शब्दस्य व्यवस्थितसाधवो वाचः परमो रसः कथ्यते। शब्दत्वं सुहृत्क्रमं जगत्कारणम्। चैतन्यमचैतन्यं च क्रमसंहारे विनाशकाले शब्दतत्त्वे प्रविलीयते। संहृते च तत्सर्गे तत्तद्रूपविभागेन विवृतं भवतीति (वैखरीरूपेण) शब्दसृष्टिक्रमः। एवं खलु चैतन्यसम्बन्धेन अन्तःसन्निवेशिनः शब्दतत्त्वात् वर्णपदवाक्यरूपविभागं प्राप्ताया वाचो यः परमो रसः तस्य अयमाञ्जसो मार्गः, ऋजुः पन्थाः। घटपटादयः पदार्था वाच एव रूपविभागा विवर्तवशात् बहुरूपं लभ्यन्ते, त एव च चैतन्यवक्तुः सम्बन्धेन श्रुतिरूपेण विपरिणमन्ते। यथा चोक्तम्-

"नामैवेदं रूपत्वेन ववृते, रूपं चेदं नामभावेऽवतस्थे।
एके तदेकत्र विभक्तं विभेजुः प्रागेवान्ये रूपभेदं वदन्ति"।। इति।।

एवं वर्णपदवाक्यात्मकम्, घटपटाद्यर्थात्मकं प्राप्ताया वाचः परमो रसः साधुभावः, शब्दस्य सम्यग्ज्ञानप्रयोगाभ्यां शब्दसाक्षात्कारजनित आस्वादश्चास्ति व्याकरणम्। "ऋजीषमेतद्वाचो यः संस्कारहीनः शब्दः", इत्युक्त्या संस्कृतः शब्दो वाचो रसः, यथा इक्षुदण्डस्य (ईख इत्येतस्य) निष्यन्दो रसः, अवशिष्टमृजीषम्, सोमस्य वा पूयमानस्य अवशिष्टमृजीषम्। निरुक्तशास्त्रेऽपि- "यत्सोमस्य पूयमानस्यातिरिच्यते तद्दजीषम्।" (निरुक्त-5.12) "रसो वै सः" इति श्रुत्या शब्दब्रह्मणो रसात्मकतया पश्यन्तीमध्यमावैखरीणां परात्मकत्वात् परमरसात्मकत्वमित्यपि बोध्यम्। अनुमितसाधुभावाः शब्दा अपि व्याकरणलक्ष्यभूताः शिष्टैः स्वीक्रियन्ते। उक्तमपि-

"शब्दार्थसम्बन्धनिमित्ततत्त्वं, वाच्याविशेषेऽपि च साध्वसाधून्।
साधुप्रयोगानुमिताँश्च शिष्टान्न वेद यो व्याकरणं न वेद।।" (हरिवृषभवृत्तौ)
आचार्येण भर्तृहरिणापि कथितमस्ति-
"प्राप्तरूपविभागाया यो वाचः परमो रसः।

यत्तत्पुण्यतमं ज्योतिस्तस्य मार्गोऽयमाञ्जसः।।" (वा.प. 1/12)

व्याकरणं हि वाचः परमं पदमस्ति। वाचो हि त्रयो रूपभेदा नामभेदेन आम्नाये महाभारतादौ च वर्णिताः सन्ति। वाचां स्वरूपोपवर्णनम् एवं कृतमस्ति कारिकासु-
तत्र वैखरी-
"स्थानेषु विवृते वायौ कृतवर्णपरिग्रहा।
वैखरी वाक् प्रयोक्तृणां प्राणवृत्तिनिबन्धना।।"
मध्यमा च पुनः-
"केवलं बुद्ध्युपादाना क्रमरूपानुपातिनी।
प्राणवृत्तिमतिक्रम्य मध्यमा वाक् प्रवर्तते।।"
पश्यन्ती च-
"अविभागा तु पश्यन्ती सर्वतः संहृतक्रमा।
स्वरूपज्योतिरेवान्तः सूक्ष्मा वागनपायिनी।।"

आसां वाचां वाक्यपदीये सविस्तरेण वर्णनं कृतमस्ति। त्रिस्वरूपा सा वाक् त्रयीति कथ्यते। अत्र

वेदानां त्रयी तु न अभिप्रेतमस्ति। तस्या त्रय्या वाचः परं सर्वोत्कृष्टम्, अद्भुतम् आश्चर्योत्पादकं च पदं व्याकरणमेवास्ति। अत्र व्याकरणशास्त्रे सामान्यविशेषवल्लक्षणैः प्रकृतिप्रत्ययविभागैरविभागैश्च सम्पूर्णं वाङ्मयं समुपनिबद्धम् अस्तीति तस्य सर्वोत्कृष्टत्वम्। पद्यते गम्यतेऽनेनेति व्याकरणस्य वागात्मनः प्राप्तिसाधनत्वम्, आस्पदत्वं च सिद्धमस्ति। वैखर्यादीनां प्रविभागाः सन्ति। तैश्च प्रविभागैः वैखर्यादीनां वाचां स्वरूपाणि एवं वर्णितानि सन्ति-

वाक्- वैखरी, मध्यमा, पश्यन्ती।

वैखरी- उच्चारणदृष्टया, संस्कारदृष्टया

उच्चारणदृष्टया- श्लिष्टा, व्यक्तवर्णा

संस्कारदृष्टया- प्रसिद्धसाधुभावा, भ्रष्टसंस्कारा

मध्यमा- बुद्धिवृत्ति, प्राणवृत्ति

प्राणवृत्ति- सक्रमा, अक्रमा

पश्यन्ती- क्रमवत्तादृष्ट्या- प्रतिसंहृतक्रमा, पुनःस्थितिदृषटया, समाविष्टक्रमशक्ति

पुनःस्थितिदृष्ट्या- चला, अचला

पुनश्च समाधानदृष्ट्या, आकारदृष्टया, अर्थदृष्टया

समाधानदृष्टया- प्रतिलब्धसमाधाना, आवृत्ता, विशुद्धा

आकारदृष्टया- सन्निविष्टज्ञेयाकारा, प्रतिलीनाकारा, निराकारा

अर्थदृष्टया- परिच्छिन्नार्थप्रत्यवभासा, संसृष्टार्थप्रत्यवभासा, प्रशान्तसर्वार्थप्रत्यवभासा

पुनश्च (विद्रूपिणी वाक्)- परात्मा(परावाक्), ज्ञानात्मा(अपरावाक्)

अपरावाक्- पश्यन्ती(अहङ्कारः), मध्यमा(बुद्धि), वैखरी(मनः प्राणः)

इति तिसृणां वाचां परमं पदमस्ति व्याकरणम्। उक्तमपि भर्तृहरिणा-

"वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम्।
अनेकतीर्थभेदायास्त्रय्याः वाचः परं पदम्।।" (वा.प. 1/142)

वाचो ह्यनेकानि तीर्थभेदानि स्थानान्युक्तानि सन्ति। तेष्वेतेषु स्थानेषु तीर्थभूतेषु सा वाक् वर्तमाना, प्रवर्तमाना, विवर्तमाना च भिद्यते। एतद् एव अस्या अनेकतीर्थभेदोऽस्ति। प्राणा मनो बुद्धिर्नाभिप्रदेशो हृदयं कण्ठः शिरस्तालुमूर्धा दन्ता ओष्ठौ च तत्रतत्र वाचः स्थानानि सन्ति।

व्याकरणशास्त्रं हि मोक्षस्य अपवर्गस्य वा प्राप्तिसाधनं द्वारमस्ति। शब्दततत्त्वं ब्रह्मेति पूर्वं व्यवस्थापितमस्ति। तेनान्तःकरणावस्थितेन महावृषभेण सह सायुज्यम्, तत्वतः साक्षात्कारो वा मोक्ष इति कथ्यते। यो हि वाग्योग्विद्वैयाकरणः सः प्रकृतिप्रत्यादिरूपविभागं प्राप्तायाः वैखर्या वाचः प्रकृतिभूतां प्रतिभाख्यां समनुगच्छति। ततश्च प्रत्यस्तमितसर्वविकारां सत्तामात्रां परां प्रकृतिं जानाति। अयमेव हि शाब्दिकानां वैयाकरणानाम् अपवर्गः खल्वस्ति। प्रत्यस्तम् इताः गताः वर्णपदादिभेदा यस्याः तां प्रत्यस्तमितभेदाम् इत्यर्थः। व्याकरणज्ञो हि प्रत्यवायहेतुभूतान् अपभ्रंशान्न प्रयुङ्क्ते। "ज्ञानं हि तस्य शरणम्" इत्युक्तमप्यस्ति। आचार्येण पतञ्जलिना पस्पशाह्निके निगदितमस्ति-

"यदधीतमविज्ञातं निगदेनैव शब्द्यते।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्।।" (महाभाष्ये, पस्पशाह्निकम्)

अत्रैव शब्दशास्त्रेण व्याकरणेन वा वाङ्मालानां वाग्विकाराणां चिकित्सापि क्रियते। ग्रस्तं निरस्तमित्यादिस्वरव्यञ्जनदोषाणामपि मलरूपाणां चिकित्सा व्याकरणमेवास्ति। व्याकरणमेव सर्वविद्यानां प्रकाशमस्ति। आन्वीक्षिक्यादिसर्वविद्यानां मध्ये

शुद्धिरूपपावनताहेतु वास्ति। अत एव व्याकरणं हि सर्वविद्यासु प्रकाशते प्रकाशमानं वर्तते। उक्तमपि-

"तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्।
पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते।।" (वा.प. 1/14)

व्याकरणेन क्रियमाणं शब्दसाधुत्वं परमात्मनः शब्दतत्त्वात्मकस्य सर्वेश्वरस्य शब्दब्रह्मणः प्राप्तिसाधनमस्ति। तेनैव शाब्दिकाः, वैयाकरणाः शब्दब्रह्मणः अमृतमयमास्वादं लभन्ते। एवं हि शब्दात्मनः प्रवृत्तिमधिगम्य वाग्योगविद्वैयाकरणः मुक्तिमाप्नोति। यथा-

"तस्माद्यः शब्दसंस्कारः सा सिद्धिः परमात्मनः।
तस्य प्रवृत्तितत्वज्ञस्तद्ब्रह्मामृतमश्नुते।।" (वा.प. 1/131)

व्याकरणागमो मोक्षस्य राजमार्गः खलु विद्यते। व्याकरणविद्येयं मोक्षे इच्छावतां, मुक्तये प्रवर्तमानानां जनानां कृते अकुटिला राजपद्धतिरस्ति, सुरक्षितः प्रधानो मार्गोऽस्ति। कल्प्यते, शब्दतत्त्वाख्यं ब्रह्म कस्मिंश्चिदुच्चस्थाने "परमे व्योमन्" इति श्रुतिसङ्केतिते परमे पदे स्थितमस्ति। तस्य सायुज्यावाप्तये सोपानमार्गरूपा काचिन्नश्रेणिः स्थापिता वर्तते, तस्या इदं व्याकरणमाद्यं पदस्थानमस्ति। व्याकरणं प्रायो वाङ्मलानां चिकित्सारूपेण शब्दाशुद्धिनाम् अपाकर्तृ, शुद्धीनां च व्यवस्थापयितृ शास्त्रं स्वीक्रियते। एतच्च व्याकरणस्वरूपं वैखरीवाण्या सम्बद्धमस्ति। तेन अधस्तादेव आद्यं पदस्थानमस्ति व्याकरणम्। यदि च तस्य दार्शनिकस्वरूपमपि गृह्यते तर्हि उपरिष्टादपि आद्यमेव पदस्थानमस्ति। अस्यां दृशि नाद्यं नान्तिमम् अपित्वेकमात्रं स्वरूपं लभते। एवं हि व्याकरणं मोक्षस्य ऋजुराजपद्धतिरस्ति। यथोक्तमपि वाक्यपदीये-

"इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः।।" (वा.प. 1/16)

शब्दब्रह्मप्राप्तेर्विविधाः प्रक्रियास्तत्र तत्र शास्त्रेषु निर्दिष्टा उपलभ्यन्ते, भक्तिः ज्ञानं वैराग्यं यज्ञादिकर्म इत्येवमादयः। एतेषां च सुव्यवस्थिता उपायाः शास्त्रेषु साङ्गोपाङ्गं विवेचिता सन्ति। तेन रुचीनां वैचित्र्यान्नृणाम् एकमपि गम्यं तद्ब्रह्म बहुधा प्रविभक्तं भवति, हरिशिवशक्तिसूर्येन्द्रादिरूपेण, ईश्वरहिरण्यगर्भविराडन्तर्याम्यादिरूपेण, ब्रह्मपुरुषोत्तमोङ्कारादिरूपेण च। एवं व्याकरणज्ञानमाध्यमेन बहुधा प्रविभक्तस्य शब्दब्रह्मणः प्राप्तिः भवति। शब्दतत्त्वं व्याकरणागम्य अधिगम्यते, इति सुस्पष्टार्थमस्ति। शब्दशास्त्रस्यशब्दतत्त्वज्ञाने प्राधान्येन हेतुत्वं सुसङ्गतम् अपरिहार्यं चास्ति।

निगदितमप्यस्ति-
"यदेकं प्रक्रियाभेदैर्बहुधा प्रविभज्यते।
तद् व्याकरणमागम्य परं ब्रह्मणाधिगच्छति।।" (वा. प. 1/22)

एवं खलु शब्दशास्त्रस्य व्याकरणस्य वा लोकोपयोगित्वं व्यावहारिकत्वम् उपकारकत्वम्, शब्दतत्त्वस्य स सर्वमयत्वं सर्वथा निर्भ्रान्तिकमस्ति। अत एव सर्वव्यवहारयोनये शब्दात्मने समर्पितमिदं शोधपत्रम्।

"यतो विवर्तते सर्वं येन सर्वमिदं कृतम्।
यत्रैव च लयं याति तस्मै शब्दात्मने नमः।।"

**संदर्भ**


1. वाक्यपदीयम्- आचार्य भर्तृहरि
2. वाक्यपदीयम्- हरिवृषभवृत्ति
3. महाभाष्यम्- महर्षि पतञ्जलि
4. शतपथब्राह्मणम्
5. ऋग्वेदसंहिता
6. मुण्डकोपनिषद्